सं. ७४

संस्कृत

पुराण
३४१२

॥ भक्तिकल्पद्रुम ॥

१०। पु. ३८

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(1)

॥ अथ श्रीभक्तिकल्पद्रुम प्रारभ्यते ॥

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(२)

|| श्रीगणेशायनमः || श्रीशंवंदेतमहंयस्यदयातारयतिनिमज्जयति || वैरेणापिभजंतंसंसृत्यब्धौसुखांबुधौयुगपत् || १ || श्रीवत्सकौ
स्तुभश्रीवक्षाःपीतांबरोघनश्यामः || मन्मानसारविंदेमिलिंदतात्संततंचिदानंदः || २ || मद्व्यक्तयस्त्रिगुणतोनोजाताःस्वीयलीलयाध्ये
याः || इतिभक्तबोधनार्थंब्रह्मजयत्यत्रिजातंतत् || ३ || यस्त्रिगुणातीतःस्यादनसूयांवाबिभर्तिधर्मेण || तस्मैमयैवदत्तोहंस्यामित्यत्रि
वरदोव्यात् || ४ || धीरोवीरोरविकुलहीरोरामःसमःसदाश्यामः || कोपिपराजितकामोजयतित्रिभुर्योगिविश्रामः || ५ || सोभयदानोदा
रःसीतादारःसलक्ष्मणःशांतः || राजार्चितपदपद्मोराजाब्जाचकोजयति || ६ || घोषनिवासिजनानांतोषकरंलीलयास्वभक्तानां || शोष
करंभवजलधेर्दोषहरंब्रह्मजयतिकृष्णाख्यं || ७ || वृंदारण्यविहारोगुंजाहारोमनोहरोदयितः || बालानांबालानांमित्रंत्वृदिजयतिमित्रश
शिदृष्टिः || ८ || सुरवरनुतपदपद्मस्त्रिपुरहरस्थिरचरेश्वरोगिरिशः || हरहरइतिरवतुष्टोनरवरदानःसनःपायात् ||९|| हरेर्हरस्यचाभेदःशा
स्त्रेणगुरुणोदितः || अतश्चेतोनभिन्नत्वंजानामीहतयोःक्वचित् || १० || तथापिपश्यामलधामवह्नुधामममानसं || आकर्षतितदेवाहंमो
हनंमहितंभजे || ११ || आमोदायसदायस्यनामसंकीर्तनंकलौ || ज्ञानैकगम्यरूपोयःपातुमांविठ्ठलोहरिः || १२ || ब्रह्मादीनामपिवा
ङ्नयस्यतोवायजायतेद्यापि || प्रेम्णानुकापिलौकिकवाणीयस्यप्रमोदकृत्सोव्यात् || १३ || अनेत्रःपुंडरीकाक्षःश्यामलःपांडुरंगकः ||
यज्ञभुग्भानिसर्वज्ञोरुक्मिणीशोप्यकिंचनः || १४ || डिंडीरपिरसःकश्चिच्छ्यामलोमधुराधिपः || अव्ययोदर्शनादस्तिनामतस्तोषपोष
कृत् || १५ || भीमरथ्यावनेकश्चित्तमालोविठ्ठलाभिधः || सर्वागमफलात्मारतेत्रिपत्रस्तापनाशकः || १६ || भीमावनेलसत्यत्रपुंडरी
कवरप्रदः || ऋक्षेशकुलराट्चित्रंगजेंद्रार्तिहरोहरिः || १७ || जडजातौधृतौदाढ्यंस्वंस्वान्बोधयितुंजनान् || शंखंचक्रमलंपाण्योर्दधाति
किमुवाहरिः || १८ || इष्टकामस्येदवस्यवंदेपादयुगान्वितां || इष्टकामस्यभक्तानांसंपूर्तिःशाश्वतीयितः ||१९|| इष्टकांतुपरंतत्वमहंमन्ये

भ. क. बुधायतः ॥ जगदाधारभूतोपियदाधारेणतिष्ठति ॥ २० ॥ शंभुहेरंबचंडांशुचंडिकाःप्रणमाम्यहं ॥ मयिप्रीतिंवितन्वंतुविष्णुभक्त्यानुकू पू. स्त. १
ल्यतः ॥ २१ ॥ कुलदेवाश्रयेसर्वइष्टदेवानमस्कृताः ॥ मयिप्रीतिंप्रकुर्वंतुविष्णुभक्त्यानुकूल्यतः ॥ २२ ॥ मयिदेवानकुप्येयुर्विष्णुभाक्ति
परेसति ॥ सर्वेषामादिभूतस्यतस्यांशाःसर्वएवहि ॥ २३ ॥ सर्वदासोहमस्म्येवयतःसर्वात्मकोहरिः ॥ ममभूयोप्यदोवाक्यंगुरुशास्त्रानुभू
॥ १ ॥ तिभिः ॥ २४ ॥ भारतीभारतीभातियस्यभागवतीतथा ॥ ज्ञानवैराग्यभक्त्याढ्यावंदेव्यासंजगद्गुरुं ॥ २५ ॥ यःस्वंभागवतंज्ञानंस्व
सुतायव्यबोधयत् ॥ आदावंतेचकृष्णायमध्येजायनमांसिमे ॥ २६ शुकतातस्ययत्सूक्तंयस्यभागवतंमुखे ॥ श्रुतिमंजुलवाक्श्ला
घ्यःसद्विजः श्रेष्टईर्यते ॥ २७ ॥ यस्मिन्पुण्यवतांप्रीत्यैप्रोक्तः पुण्यजनक्षयः ॥ कृतंरामायणंयेनतस्मैवाल्मीकयेनमः ॥ २८ ॥ मा
तान्नपूर्णापिचविश्वनाथःपितातदीयांघ्रिसरोरुहेभ्यः ॥नमांस्यजस्रंकरवाणियैःस्युःश्रेयांसिभूयांस्युदितानिलोके ॥ २९ ॥ विष्णुब्रह्मात्रि
दत्ताद्यान्विठ्ठलांतान्गुरूनहं ॥ सच्चिदानंदरूपांस्तान्वंदेसुविनयान्वितं ॥ ३० ॥ प्रसन्नवदनंशांतंनादसल्लीनचेतसं ॥ योगिराजंनमा
मीहश्रीमद्विठ्ठलसद्गुरुं ॥ ३१ ॥ वंदेहरेर्गुरोःपादान्भूरिस्तुरिनमस्कृतान् ॥ दोषापल्हृतयेलोकप्रबोधाययदागमः ॥ ३२ ॥ भ्रांताःसंतो
भिगच्छंतुजडतीर्थानिसंततं ॥ हरिनामपदंयामितीर्थंबोधसुखप्रदं ॥ ३३ ॥ एकस्मादेकोर्थोभवतिततोनापरोत्रार्थः ॥ चत्वारःपुरु
षार्थाहरिगुरुपादांबुजप्रसादेन ॥ ३४ ॥ संधेःक्वचिद्विग्रहतःसमासाद्गुरोर्लघोर्वापिचवर्णतोन्ये ॥ भवेयुरर्थाःकिलभूररूपाआवार्यतःश्री ॥ १ ॥
हरितःपरोपि ॥ ३५ ॥ विश्वोत्पत्त्यादिकार्येषुविधींद्राद्यानियोजिताः ॥ सर्वेलघुपदंयातायतःसंसृतिहेतवः ॥ ३६ ॥ विश्वोद्धारेम
हाकार्येसाधवःशांतमूर्तयः ॥ सन्नियुक्तास्तएवेहसम्मतागुरुतांगताः ॥ ३७ ॥ यःश्रुतिशिरोगिरानिजशिष्यंसंबोधयन्भ्रमंहरति ॥ त
स्मैश्रीगुरुवर्यायाद्वैतायास्तुमत्प्रणतिः ॥ ३८ ॥ कोशेषुनिर्ममत्वंजातंतदपिस्वपूर्णताभाति ॥ चित्रंसद्गुरुकृपयाप्यकिंचनोभाग्यवद्वर्यः

Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao … Pratishthan, Mumbai. Joint project of the

(3A)

॥ ३९ भ्रमरहितादस्मादिहजातोदेशिकमुखांबुजाच्चित्रं ॥ बोधाख्याद्विजराजोमुष्मात्स्वानंदजलधिरयं ॥ ४० ॥ भक्त्यागुरुपदपंकज
मधुनात्वंदेस्त्रसौख्यजलराशीं ॥ यद्रजसास्त्रेनहरतिपंकजडभावमाशुनाशयति ॥ ४१ ॥ भवजलधिनाशहेतुःसततमुदयप्रानूकलं
कराहितश्च ॥ चित्रंश्रीगुरुवदनद्विजराजोयंतमोगिलति ॥ ४२ ॥ गुरुभ्यःसंतुसर्वेभ्यःसदाप्रणतयोमम ॥ तेषांप्रसादतोभूयाद्भक्ति
र्भगवतिस्थिरा ॥ ४३ ॥ कवयःकवयोनवयंकवयःसरसाःसरसानवयंसरसाः ॥ सुधियःसुधियोनवयंसुधियःसकलाःसकलानवयंस
कलाः ॥ ४४ ॥ नव्याकृतिप्रवीणत्वंनालंकारेषुविज्ञता ॥ नव्याकृतिरियंभक्त्यानालंभावमुपागता ॥ ४५ ॥ दोषान्समुत्सार्यगुणान्क
रोतुस्वभावतःकोपिबुधोजनोत्र ॥ येप्रार्थिताअप्यनृजुस्वभावास्तेषांमिहप्रार्थनयाफलंकिं ॥ ४६ ॥ इदंदोषयुतंकाव्यमपिश्लाघ्यंबुधै
र्यतः ॥ आदौमध्येवसानेस्मिन्नुत्तमश्लोकईर्यते ॥ ४७ ॥ अन्वयव्यतिरेकाभ्यांगुणानामच्युतप्रभोः ॥ सपद्यकविताश्राव्यात्राच्या
स्याद्वामतासतां ॥ ४८ ॥ भक्तिकल्पद्रुनोयंथःसदाभीष्टफलप्रदः ॥ संतापहारकोभूयात्संतानाधिकशर्मकृत् ॥ ४९ ॥ भक्तिकल्पद्रुमे
मुष्मिन्गंगाधरात्रिनिर्मिते पूर्वार्धेस्तबकःपूर्णःप्रथमोस्तुसतांमुदे ॥ ५० ॥ इतिश्रीभक्तिकल्पद्रुमपूर्वार्धेमंगलस्तबकः ॥ १ ॥ श्रीकृ
ष्णार्पणमस्तु ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

(५)

॥ श्रीगणेशायनमः ॥ विष्णोःकेवलयाभक्त्याकृतकृत्योभवेद्यथा ॥ कर्मज्ञानतपोयोगैर्नतथाबहुसाधनैः ॥ १ ॥ तावत्स्ववर्णाश्रमधर्म
कर्मसांगंचरेत्कोपिनरःप्रयत्नात् ॥ यावन्नभक्तिर्भगवत्यखंडाभवेद्ययास्वांतसुखंनिरंतं ॥ २ ॥ धर्मस्यार्थस्यकामस्यचेतःशुद्धेश्चसंमतं ॥
ज्ञानवैराग्यमुक्तीनांसाधनंहरिसेवनं ॥ ३ ॥ स्वनुष्ठितस्यधर्मस्यहरिभक्तिर्वरंफलं ॥ भक्तिहीनमपिज्ञानंव्यामंप्राहुर्बुधाःकिल ॥४॥ धर्मः
सएवगदितोबहुभिर्मुनींद्रैर्भक्तिर्यतोभवतिमाधवएवपुंसः ॥ अन्यःस्वनुष्ठिततयापिविराजतेनाकिंचित्फलोभवतियोहरिभक्तिहीनः ॥ ५ ॥
विश्वंविष्णुंमन्यतेविष्णुभक्तस्तन्वन्भाक्तिंसर्वभूतेष्वजस्य ॥ सुव्यक्तोस्मिन्ननंद्यातस्वात्मभावोऽव्यक्तासक्तःक्लेशमाप्नोत्यवश्यं ॥६॥ सुव्य
क्तेस्मिन्भुवनेजडतांमत्वाततोन्यरसमिछेत् ॥ सतकूपक्लेशगामीभ्रमभाक्स्यादत्रकिंचित्रं ॥ ७ ॥ त्रिगुणमयेभवजालेबध्यंतेप्राणिनस्सक्त
कालेन ॥ श्रीमन्मुकुंदसत्कृतभक्तिमलब्ध्वानमुच्यंते ॥ ८ ॥ संसारकूपेपतितंमनुष्यंत्दृतेक्षणंवारजआदिदोषैः ॥ कालाहिनाग्रस्ततनुं
नितांतंसमुद्धरेदत्रहरिंविनाकः ॥ ९ ॥ हरेर्व्यक्तिरभून्मीकेसततंकामदासतां ॥ अवमत्यविमूढास्तांयांत्यहोकामदासतां ॥ १० ॥ निरा
कारोपिसाकारःसदामोदाकरश्रयः ॥ देवक्यानंदनोभातिभक्तानांत्दृदयेनिशं ॥ ११ ॥ अजन्मातथानामरूपोगुणात्मास्वयंमास्यपत्नी
सुतोजोप्यनंगः ॥ विनायातिपत्रेणखंयत्पदंसप्रभुर्भक्तितोभक्तसंतानरूपः ॥ १२ ॥ सदवनकर्त्राभर्त्रानदशाउच्चावचाःक्वचिद्ध्येयाः ॥
अंगीकृतानियस्माद्दशावतरणानिहारिणापि ॥ १३ ॥ वेषांतरेपिसुमहान्भुवनेयोग्यंस्वचिन्हमाधत्ते ॥ इतिविष्णुर्मीनोभूदनिमिषवरतां
दधानःस्वां ॥ १४ ॥ जडजंतुर्नलोकेस्मिन्विद्यायाधारणेक्षमः ॥ चित्रंमत्स्याकृतिर्भूत्वावेदानुद्धृतवान्विभुः ॥ १५ ॥ भृशंभक्तानुरक्त
त्वंव्यक्तंकर्तुंप्रसक्तधीः ॥ स्वपृष्टेमंदरागंतंचक्रेकूर्माकृतिःप्रभुः ॥ १६ ॥ यज्ञेशंयज्ञतोयज्वामदभेदेनमांभजेत् ॥ इत्यसौयज्ञवाराहरूपंकिं
धृतवान्हरिः ॥ १७ ॥ रसावंतंहिरण्याक्षमसावंतमनीनयत् ॥ यज्ञयूपवतींचक्रेसुज्ञभूपवतींभुवं ॥ १८ ॥ स्वभक्तरक्षणेदाक्ष्यमसतःशा

(5)

 



सनेक्षितौ ॥ नारसिंहीयचरितेप्रकटंप्राभवत्प्रभोः ॥ १९ ॥ पुराणरूपोपिशिशुत्वमाप्तोहृस्वोप्यनंतोबलियज्ञवाटे ॥ महावदान्योपिकु
याचकोभूदनुग्रहेच्छुः सकलस्वहर्ता ॥ २० ॥ सुपूतंचरितंविष्णोरपिक्रूरतरंयदि ॥ क्षत्रियासृङ्मयंतोयंजनानामतिपावनं ॥ २१ ? भव
जलधितर्त्तुकामैःसेव्योहंयत्नतःसदाविबुधैः ॥ इतितरणिसंततिप्रभुरभवच्छ्रीरामभद्रोनु ॥ २२ ॥ जनपावनत्वमपिधर्मसक्तागुरुनम्र
तानिखिलहार्दपात्रता ॥ शरणार्थिरंजनमथारिभंजनंरघुनाथमत्रभुवनेऽस्तिसंसदा ॥ २३ ॥ संसृतिसिंधुंततुंयत्नादहमेवसर्वदासेव्यः ॥
इतितारकेशवंशेजातःकृष्णःसनःपायात् ॥ २४ ॥ गोपेषुगोपीषुगिरिष्वगेषुलतासुवृंदावनभूमिजासु ॥ अनुग्रहोभक्तकदंबआस्तांविनि
ग्रहःशत्रुषुमोक्षदोस्य ॥ २५ ॥ सुमनोविद्विषामेषांमाभूत्पापंसुदुस्तरं ॥ करुणात्मेतिबुद्धःसचक्रेऽहिंसाप्रबोधनं ॥ २६ ॥ यःकेवलोपि
चतुरंगबलेनयुक्तः कल्क्याख्ययाबुधवरैरुदितोप्यकल्की ॥ योवर्ण्यतेत्रकृतहेतुतयामुनींद्रैःपायात्समांसुरवरःकलिकालभीतेः ॥ २७ ॥
योभक्तानांत्राणहेतोर्जगत्यांनानाजन्मान्यप्यविभ्रब्दिभर्ति ॥ सोसौनित्यंदीनबंधुःपरेशःकारुण्याब्धिर्माधवःसेवनीयः ॥ २८ ॥ भक्त
कल्याणहेतोर्यःसाकारःसंभवत्यजः ॥ हरेःकःसेवनीयोन्यःकोत्रासत्वाकृतिःप्रभुः ॥ २९ ॥ सगुणंनिर्गुणमेकंमत्वायोभजतितरति
शीघ्रंसः ॥ तस्मादनन्यभावाद्भक्तोभूत्वाभजेत्सगुणं ॥ ३० ॥ त्यक्त्वासगुणंनिर्गुणसाक्षात्कारंभजेत्पुमान्यदिवा ॥ पंगुःक्षणात्सुमेरूल्लं
घनशक्तोनकिंतर्हि ॥ ३१ ॥ योनभजेत्श्रीकृष्णंसगुणंतंतस्यभगवतोमाया ॥ संमोहयेच्छरण्यंमायाधीशंभजेद्धरिंतस्मात् ॥ ३२ ॥
मायांरात्रिंप्राहुर्निजतमसायागतिंनिरोधयति ॥ यस्यांनिद्रातिजनःस्वंनोजानात्यरियस्तं ॥ ३३ ॥ सदसद्वस्तुज्ञानंनजातु
चिदपिजायतेविनायत्नं ॥ स्वापक्रियाप्यवश्यंभवतिजन्मादयःस्वप्नाः ॥ ३४ ॥ तस्मात्सहस्रपादंभजेदमुंश्रीहरिं-
सदाभ्युदितं ॥ सर्वव्यापिनमेकंतेनभवेत्संततंसुदिनं ॥ ३५ ॥ अजंप्रपद्यमानोयःसंसृतिस्तस्यनोयतः ॥ अजातंनैवबध्नीयादतस्तंशरणं

(5A)

व्रजेत् ॥ ३६ ॥ जनार्दनंयस्तनुवाङ्मनोभिःप्रपद्यमानःशरणंजनोत्र ॥ असावजोनार्दनएवतस्मैददात्यभीतिंचवरंस्त्वभीष्टं ॥ ३७ ॥
श्रुतिषुस्मृतिषुव्यासवाल्मीक्युक्तिषुसर्वतः ॥ कारणंशरणंसर्वलोकानांनंदनंदनः ॥ ३८ ॥ भवापगातारकमेवमत्वानरोभजेतोडुपसंत
तशिं ॥ प्रभावतोस्याशुमरीचिकास्यात्भवेत्ततःकौतुकसिंधुमग्नः ॥ ३९ ॥ भवभुजगाद्भीतःसन्गरुडध्वजभजनकृज्जनोयःस्यात् ॥
ज्ञात्वाविवर्त्तमेनंकुतुकात्तद्भक्तिसुखरक्तः ॥ ४० ॥ भक्तिकल्पद्रुमेमुष्मिन्गंगाधरविनिर्मिते ॥ पूर्वार्द्धेस्तबकःपूर्णोद्वितीयोस्तुसतां
मुदे ॥ ४१ ॥ इतिश्रीभक्तिकल्पद्रुमपूर्वार्धेद्वितीयस्तबकः ॥ २ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratish

(८)

॥ श्रीगणेशायनमः ॥ नारायणकरुणामरतरुफलरूपोभवेत्सतांसंगः ॥ यस्मादच्युतभक्त्युल्लासरसःसोपिहार्दफलः ॥ १ ॥ साधवोदुर्ल
भास्तेस्युर्माधवोल्वृदियैर्धृतः ॥ अनार्यचर्याधुर्यास्तेनार्यागर्ह्यास्तुपुष्कलाः ॥ २ ॥ सुलभानयेत्रक्रतवयोहरिपादोल्लसितपुष्कलानंदाः ॥ जड
जीवघातकायेचरंतिभुवनेतुबहवोन्ये ॥ ३ ॥ वत्सलाःखलुसंतःश्रीवत्सलांच्छनसेविनः॥ अभयंस्यात्ततःशीघ्रमुभयंयत्रनास्तितत् ॥४॥
येमस्तकेसच्चरणाब्जधूलिंवहंतितेषामखिलानिसद्यः ॥ रजस्तमांसीविलयंप्रयांतिभवंत्यहोसर्वगुणाश्रयास्ते ॥ ५ ॥ स्वल्पोपिसंगःखलु
सज्जनस्यदत्वेहभक्तिंजगदीश्वरस्य ॥ संतारयत्यत्रभवांबुधौततत्प्रसंगमाहात्म्यविदोत्रयंकिं॥ ६ ॥ सत्संगोच्छिन्नपापस्यभाक्तिःस्यात्सुल
भाविभौ ॥ त्रिवर्गश्चापवर्गोपिभक्त्यानोदुर्लभावुभौ ॥ ७ ॥ वेदीवेदस्यार्थवेत्ताविभानीशांतोदांतःसर्वभूतात्मकःसन् ॥ कारुण्याढ्यो
माधवप्रेमयुग्यःसेव्यःसाधुःसर्वदेशप्रियोयत् ॥ ८ ॥ वर्णीगेहीवानवस्थोयतिर्वायोगीकश्चिद्भोगभाग्भाग्यतोन्यः ॥ सम्यग्भक्तिज्ञानवैरा
ग्यभाग्यःसाधुःपापान्पावयत्येवनित्यं ॥ ९ ॥ जनैर्नोच्छिद्यमानोपिदह्यमानश्चसर्वतः ॥ परानामोदयेत्सर्वान्पंडितःसिल्हकोयथा
॥ १० ॥ दह्यतेलोकदृष्ट्यैवखंडयतेपिचदुर्जनैः ॥ देहातीतात्मनाभाग्यादह्यतेनचखंडयते ॥ ११ ॥ जनार्दनःपंडितएवसाधुर्विदग्भता
भाङ्नचखंडयमानः ॥ भुतंमहद्विष्णवभिधानमेतत्करोतिवश्यंस्वजनैकलक्ष्यं ॥ १२ ॥ सज्जनेवापिकूटस्थात्मनिवाप्रत्ययेपिच ॥
उपसर्गःप्रयुक्तश्चेत्प्रयोक्तुर्दोषकृद्भवेत्॥ १३ ॥ विष्णुपदंभजतिसदाक्षयवृध्योःसाम्यमेवधत्तेयः ॥ सकलात्माद्विजराजस्ततोमृतंप्राप्यतेत्रि
बुधैः ॥ १४ ॥ विष्णुपदप्राप्तःसनूतमोनयःकीदृगितिविजानाति ॥ हंसस्यतस्यसंगात्भवतिजडात्मापिसकलात्मा ॥ १५ ॥ पक्षबलेना
संख्याःसमुत्पतंतोद्विजाभवंत्वेते ॥ हंसस्योज्वलतांवागतिंमहत्वंनविंदंति ॥ १६ ॥ लघवोपिवामहांतःसंतुपतंगाव्यभिख्ययायुक्ताः ॥
विश्वंप्रकाशयतियःख्यातःकिलसोव्यभिख्यावान् ॥ १७ ॥ योकिंचनोपिजिह्मगवृतोपिवृषगःसदैवशुचिरूपः ॥ शिवइवसनरोविबुधैर्लो

7)

भ. क. केस्यात्संततंसेव्यः ॥ १८ ॥ यःसकलकर्मसाक्षीनिजधर्मेषुप्रवर्तयतिलोकान् ॥ जाड्यनिवारणदक्षःसनमस्कार्योयथासूर्यः ॥ १९ ॥ पू. स्त. ३
सूर्याश्रयतःस्वल्पात्कालात्प्रतिपद्युतोजडात्मापि ॥ तमसोनिवारयित्र्यादिनेदिनेवर्द्धतेकलया ॥ २० ॥ रघुवरगुणजालेनोद्गीतेनश्रोतृमान
॥ ५ ॥ सकुरंगान् ॥ येसन्नयंत्यचलतांचित्रमलुब्धाश्चधीवरास्तेपि ॥ २१ ॥ श्रीकृष्णलीलामृतवर्षयोगाद्भवाग्निशांतिंशरणागतानां ॥ कुर्वंतिये
विष्णुपदेतिसक्तास्तेसज्जनाजीवनदामतामे ॥ २२ ॥ यथायथासाधुसमागमःस्यात्तथातथाश्रीशकथाप्रसंगः ॥ यथायथावासकथाप्र
संगस्तथातथासौविमलांतरात्मा ॥ २३ ॥ यथायथानिर्मलमानसःस्यात्तथातथाचित्सुखरूपविष्णुः ॥ भवेद्धृदिस्थश्चयथायथासौतथा
तथाप्रेममयात्मरूपः ॥ २४ ॥ संगात्सतांभवेत्किलभक्तिःश्रीशस्यसद्गुरोःकरुणा ॥ परमश्रेयःप्राप्त्यैकुर्यात्सत्संगमंनरस्तस्मात् ॥२५॥
परीक्ष्यसंतंसहवासनोत्रभजेतधीमान्बहुकालतश्च ॥ सद्रूपतोवंचनतत्परायतत्वसद्व्यसंतोधनलुंठनाय ॥ २६ ॥ अंतःकपटबाहुल्याबहि
र्धर्मपरायणाः ॥ नतेषांसंगमात्तापशांतिर्लोकस्यजायते ॥ २७ ॥ सारस्वतेरसेमग्नाआपिसाधुपदेस्थिताः ॥ उपलाइवकाठिन्यादंतर्वै
रस्यभूमयः ॥ २८ ॥ सदंभस्थितिमंतोपिबहुतृष्णाकुलानराः ॥ नरसंप्रतिविंदंतिनरसंप्रतिकिंत्रुवे ॥ २९ ॥ सदंभोयुक्तएवेतिन्ह
दवत्कीर्त्यतेमलः ॥ नीरसत्वयुतःसोंतःपंकबाहुल्यवानपि ॥ ३० ॥ शुचित्वमपिसाद्गुण्यंयत्रनैववियुज्यते ॥ श्लाघ्यासरलता
भातित्वदिपुण्यवतःक्वचित् ॥ ३१ ॥ सरलाविरलालोकेपरलाभेनानिवृताः ॥ स्वार्थमेवयतंतेतेसंत्यसंतःसहस्रशः ॥ ३२ ॥ वाना ॥ ५ ॥
शनोपिपुष्टयैभोगस्यैवाखुत्वदृच्छुतिविहीनः ॥ गूढपदोयदिसविधेवसेत्सुखंस्यात्कथंपुंसः ॥ ३३ ॥ भोगासक्तोनितरांगानेरक्तस्ततो
भुजंगोसौ ॥ त्याज्योदूरंसद्भिःस्यादुपदेशेकथंयोग्यः ॥ ३४ ॥ यःसन्विपरीतात्माहिनस्तिपुरुषंनिजाश्रियःस्पर्शात् ॥ तद्भोगियुक्त
देशंत्यक्त्वादूरंसुखंजीवेत् ॥ ३५ ॥ भवातिजडस्यकुसंगात्पंककरस्त्वंचकुटिलगामित्वं ॥ भ्रांतिश्चाधःपातःकिंवाचित्रंबुधाअत्र ॥ ३६ ॥

(7A)

निपतत्यधोनिरंतरमापिपंकंसर्वदाकरोत्येव ॥ वर्धयतितृणंनित्यंपरिहार्यःकिंजडस्वभावोयम् ॥ ३७ ॥ साध्वसंगतएवात्रसाध्वसं
गेनमोहतः ॥ साध्वसंगात्पुनःसाधुःसाध्वबाधपदंगतः ॥ ३८ ॥ दुर्जनागर्जनांकृत्वातर्जयंतिभृशंजनं ॥ तेषामुपार्जनंत्यक्त्वाकार्यं
सद्भिर्विसर्जनं ॥ ३९ ॥ असतःसंगम्मान्नूनंसतआमोदहीनता ॥ संयोगाद्रामठस्येहयथाकाश्मीरजन्मनः ॥ ४० ॥ द्यूतंमद्यंहिंसा
कांताऽनर्थप्रदाभवतिपुंसां ॥ तस्माद्दुर्जनसंगंविहायविहरेत्सतांसंगी ॥ ४१ ॥ पापानिनाशयतिकारयतीहसाधुकर्माणिचित्तशुचितां
तनुतेसदिष्टं ॥ भक्तिहरौदिशतिचात्मसुखानुभूतिंसत्संगमःसुरतरुंजयतिप्रकामं ॥ ४२ ॥ भक्तिकल्पद्रुमेमुष्मिन्गंगाधरविनिर्मिते ॥
पूर्वार्धेस्तबकःपूर्णस्तृतीयोस्तुसतांमुदे ॥ ४३ ॥ इतिश्रीभक्तिकल्पद्रुमेपूर्वार्धेतृतीयस्तबकः ॥ ३ ॥ ॥ ॥ ॥ ॥ ॥ ॥

of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

॥ श्रीगणेशायनमः ॥ आयुषोतीवचांचल्यंमानुषंजन्मदुर्लभं ॥ विषयाबंधकास्तस्मात्सविरागोहरिंभजेत् ॥ १ ॥ विनायेनभवेन्नैव
चित्तवृत्तिःस्थिराक्वचित् ॥ वैराग्यमुच्यतेतस्मात्ज्ञानभक्त्येकसाधनं ॥ २ ॥ मानुषंजनुरासाद्यपरेतत्वेनयन्मतिः ॥ तमप्याहुर्बुधाश्चि
त्रंपरेतत्वेस्थितंनरं ॥ ३ ॥ संप्राप्यमानवत्वंजित्वारीन्स्वपदभाक्भवेत्सैकः ॥ क्षेत्रारामाबहवोगोपालाअत्रदृश्यंते ॥ ४ ॥ नरतां
प्राप्ययोमोहाद्भोगासक्तोभवेज्जनः ॥ पशुःसमानवाकारोनुज्वलात्मानसंमतः ॥ ५ ॥ बहुजन्मस्वप्यनूतागमात्सुदुःखानिलब्धानि ॥
प्राप्यापिनृतांचित्रंनतंविमुंचत्यसौमोहात् ॥ ६ ॥ नृभुवोप्यनुभूर्वांतिसमाश्रितायेजनामहामोहात् ॥ क्षिपतिहरिस्तानासुरजन्मसुयुक्तंस
दैत्यारिः ॥ ७ ॥ मानुषंजनुरिदंसुदुर्लभंतद्भजेदकविवर्जितोहरिं ॥ नाकिनायकदुरापमद्वयंप्राप्नुयात्सुकविलभ्यसुखंतत् ॥ ८ ॥ बा
लोहंविचरिष्यामीच्छातःश्रेयसेयतिष्येहं ॥ तरुणःसंस्तरुणोहंभोगस्यैवास्त्ययंकालः ॥ ९ ॥ वृद्धःसन्मंदात्माकिमहंकर्तुंसमर्थोत्र ॥
यातंतत्तारुण्यंयस्मिन्नक्षाणिदक्षाणि ॥ १० ॥ पलितंवलितंजातंरुग्णंभुग्नंशरीरकं ॥ चरितंचरितंदुष्टंनक्वापिसुकृतंकृतं ॥ ११ ॥ बा
ल्येयतेततस्माच्छ्रेयसइहयौवनेजरायांच ॥ सततंतेषुत्रयःसुनरोल्पःपुष्टिमानुक्षीणः ॥ १२ ॥ इदमिदमिदंचवासःसम्यक्प्रक्षाल्यतुष्ट
छमंकुर्यां ॥ मत्वाम्रियतेरजकस्तद्वनुइवोहंकरिष्यामि ॥ १३ ॥ नरजन्मैवपापस्यमूलंपुण्यस्यचेरितं ॥ तस्मात्धितेच्छुर्धर्मेणपाप
माशुविनाशयेत् ॥ १४ ॥ धर्मेणदेवद्विजपूजनानिधर्मेणतृप्तिश्चगतिःपितॄणां ॥ धर्मेणशुद्धिर्मनसोपितन्वाधर्मेणलोकेभवतीष्ट
सिद्धिः ॥ १५ ॥ बताज्ञानवशादेवधर्ममार्गपराङ्मुखाः ॥ पापाभवंतिनोचित्रंविद्वांसोपिकलौयुगे ॥ १६ ॥ धर्मस्यचाप्यधर्मस्यक्षयः
पुष्टिर्युगेयुगे ॥ क्षयपुष्टयोस्तयोरस्मिन्पूर्णतैवकलौभुवि ॥ १७ ॥ धर्मस्यस्थापकःश्रीशःसम्यक्संतश्चरक्षकाः ॥ तथापिक्षीणतांधत्ते
श्रेयान्प्रायोनवर्द्धते ॥ १८ ॥ अधर्मःक्षतावेकपादेनसत्येपदाभ्यांपदैर्वाद्वितीयेतृतीये ॥ चतुर्भिश्चतुर्थेयुगेधर्महानिर्गुणिष्वेवनूनंकृशत्वं

समेति ॥१९॥ अस्योद्भवोऽभवदिहप्रगएवयस्मात्तस्मात्कुशत्वमगमत्किलधर्मएषः ॥दैवज्ञवर्यवचनंवखुधातलेस्मिन्जन्मास्थितोदिनकरः
कुरुतेंगपीडां ॥ २० ॥ तपःशौचदयासत्यपरोधर्मसमाचरेत् ॥ तपआदिविहीनस्यभवेत्कर्मयदासुरं ॥ २१ ॥ यत्रनतपोनशौचंनदया
सत्यंनविद्यतेसाधु ॥ असदेवकर्मतत्स्याद्व्यर्थंव्यस्तंसमस्तमपि ॥ २२ ॥ वाङ्मनोवर्ष्मभिस्तप्तंतपोयैर्हरितुष्टये ॥ तापसानामहंतेषां
तापसत्वंनविद्यते ॥ २३ ॥ शुचित्वमेवसंपाद्यंबहिरंतःसदानरैः ॥ साधनंसर्वधर्माणांज्ञानस्यचयदीरितं ॥ २४ ॥ दयामयंविजानाति
सुखायसकलोजनः ॥ तदभावंनिरीक्ष्यैवदुर्भाग्यंयद्विनिंदति ॥ २५ ॥ चिरंजीवतुसानंदंसदयःश्रीयुतोस्तुसः ॥ अदयैःपृथिवीभारभूतैः
किंबहुभिःफलं ॥ २६ ॥ दययाखुकीर्तिरिहजायतेनृणांदययैवसर्वजनवश्यताभुवि ॥ दययैवयात्यखिललोकवंद्यतांनदयासमंरघुपतेः
सुतोषणं ॥ २७ ॥ अदयातुयातुरूपंकरोतिसायातुनाशमलं ॥ सदयोदयोस्तुसततंगायंतिगायनाःप्रेम्णा ॥ २८ ॥ सत्यंसत्वमहंमन्ये
तद्धिदायवमात्रतः ॥ सत्यसत्ववतोर्यस्मान्नाचारोभिद्यतेक्वचित् ॥ २९ ॥ धर्ममादौसमाश्रित्ययथाशक्तिकलौबुधः ॥ संसाराब्धेःसमु
त्तीर्णोभवेद्भक्त्येकतत्परः ॥ ३० ॥ श्रीशैकमतयोयेस्युर्विषयेषुपराङ्मुखाः ॥ चरंतुधर्मंमात्रातेदोषभाजोभवंतिन ॥ इतिधर्म
प्रशंसनं ॥ अथधनादिगर्हा ॥ सर्वेषामिष्टतमंधनमर्पितविधनहेतुःस्यात् ॥ यत्रविवेकःसुलभोभीहानिस्तद्वरंदैन्यं ॥ ३१ ॥
मत्वाधनंमदीयंददातिभुंक्तेनयोमहामोहात् ॥ जन्मांतरेसभोगीभूत्वापिनभोगभुग्भवति ॥ ३२ ॥ स्त्रीसूनायुतानांमदि
रायायोगदंधनंयस्मात् ॥ तस्मात्कलेर्निवासंप्राहुर्नित्यंबुधाएतत् ॥ ३३ ॥ मज्जंतोपिभवाब्धौवस्विच्छंत्यतितरांनरामो
हात् ॥ केचनलब्धेतस्मिन्स्पर्शविहीनानिमज्जंति ॥ ३४ ॥ अशब्दोविसर्गेणयुक्तोभवेच्चेत्गुरुःश्रीधराभिख्ययाचप्रसिद्धः ॥ सए
वाविसर्गोलघुश्चाप्यभावेनिषेधेप्रयुक्तःपुमान्किंनतद्वत् ॥ ३५ ॥ साधनवत्त्वाच्छलाघ्यायत्रायंस्वंसुखंपुमान्भुंक्ते ॥ भोगेदानेप्यनहंभावो

॥ ७ ॥ ॥ ७ ॥

Rajwade Sanshodhan Mandal, Dhule and ... Pratishthan, Mumbai

(9A)

भवतिचकृपापिसकलेषु ॥ ३६ ॥ अंधःप्रचुरंस्याचेच्छर्मभवेदिति दिवानिशंभ्रमति ॥ तच्चिंनयायमंधोभूत्वामृतमश्नुतेनैव ॥ ३७ ॥ प्रार
ब्धतःसुखंवादुःखंस्वल्पंमहद्भवतिपुंसः ॥ इतिनोजानन्वांछांकृत्वाभवसागरेमग्नः ॥ ३८ ॥ तत्सुखवांछात्याज्यात्रिविवेकवैराग्यनाशिनी
सततं ॥ उच्चावचयोनीनांबहुदुःखानांहिहेतुःसः ॥ ३९ ॥ अबंधस्वकलाभाययत्नंकुर्युःसदाजनाः ॥ अबंधःस्वार्थमटनमेषांरोधायजाय
ते ॥ ४० ॥ भवेदाशयाज्ञानवैराग्यनाशःसदाभ्रांतिमत्ताचसन्मानहानिः॥ अनाशांतमाहुर्नसायस्यचित्तेततःसैवहेयाबुधैर्दुःखेऽनुः॥४१॥
अपिसर्वादिशोयांनंयाचमानंधनंसदा ॥ दक्षिणाशास्थितंनिंदनबहुनौतिमूढंबुधः ॥ ४२ ॥ स्वल्पार्थार्थंकुरुतेपुरुषाणांसंस्तवंकविर्वा
चा ॥ त्हृदयस्थंपुरुषोत्तममपिनस्तौत्येषपूर्णलक्ष्मीशं ॥ ४३ ॥ अयमेतन्मेदद्यादित्थंकृत्वाहमाप्नुयांशर्म ॥ एवंवांछांकृत्वानात्मानंदं
विजानाति ॥ ४४ ॥ बहुधातुरसज्ञस्यसुवर्णाप्तिःपदेपदे ॥ सुधासापिभवेन्नूनंश्रीशस्यकरुणांविना ॥ ४५ ॥ ॥ राजाशिरसापिधृतोयस्य
सखाराजराजोस्ति ॥ गिरिशोवृषानुयायीदिगंबरःसोपिदैवेन ॥४६ ॥ परिमितदेहगृहाद्यभिमानात्परिमितसुखंवहुव्यसनं ॥ भजतेसत्य
ज्ञानानंतानंदंनजानाति ॥ ४७ ॥ एतद्गृहंमदीयंत्वस्याम्यस्मिन्कुटुंबवर्गेण ॥ इतिगृहरतंमनुष्यंकालोनृभ्रंप्रसेदाशु ॥ ४८ ॥ निलयेत्वं
तासक्तोभूत्वाकोनामनोनिरयवान्स्यात् ॥ इतिहिस्त्रैनंश्रीमन्नारायणमाश्रयेदेकं ॥ ४९ ॥ अस्मिन्निशांतमध्येज्ञानरवेर्जायतेतिरो
धानं ॥ पंकेचिरंनिमग्नंचेतःपद्मंनविकचतामेति ॥ ५० ॥ अधिकार्यहंगरीयानित्यभिमानात्करोतिसदमानं ॥ स्वानंदाप्तेरधिकारित्वंत
न्नैवजानाति ॥ ५१ ॥ भूजलतेजोवाय्वाकाशानांयःस्वयंनियंतात्मा ॥ किमिदंपरिमितपृथ्वीपतिरित्यभिमानवान्जातः ॥ ५२ ॥ देशा
धिपतिर्भूत्वापूर्णानानंदमश्नुतेतावत् ॥ देशिकपदाब्जयोगादुपदेशाप्तिर्नयावत्स्यात् ॥ ५३ ॥ विषयान्स्वेनविहीनान्कृत्वाभुंक्तेत्वरा
जायः ॥ तंस्वपदस्थितिमूढंवदंतिविबुधाःकिमाश्चर्यं ॥ ५४ ॥ नयतिपतिमधःपातंपत्नीशब्दस्यमुख्यएषोर्थः ॥ ज्ञातश्चेदनुरक्तिस्तस्यांवि

बुधस्यैनैवभवेत् ॥ ५५ ॥ रामापांगान्सत्यंविद्धित्वंपश्यतोहरानेव ॥ अप्येकांतोनिहितंहरांतियेस्त्वंद्रुतंयस्मात् ॥ ५६ ॥ मदिरामोहय
त्येकंयार्पिताऽपरिमाणतः ॥ दर्शनार्चिंतनान्नारीततोधिकतमामता ॥ ५७ ॥ इलासंमोहयत्यत्रापिबेतंकेवलंजनं ॥ दर्शनाचिंतनात्स
र्वान्महेलास्त्रीमताततः ॥ ५८ ॥ ब्रह्मैवजीवसंज्ञंकरोतिमायातदीयएषोंशः ॥ भार्यारूपोयस्तत्सुविरक्तोत्रब्रह्मरूपःसः ॥ ५९ ॥ अस्वा
तंत्र्यात्क्वचिदपिमायांभार्यांवदामिपुरुषस्य ॥ अप्रेस्थातुमशक्तायन्मूलोयंभवोलोके ॥ ६० ॥ पुरुषंविनानवस्याःसौभाग्यंदृश्यतेपि
लोकेस्मिन् ॥ पुरुषःस्त्रियाविहीनोवंद्योत्रर्णीयतिर्वनवान् ॥ ६१ ॥ भार्याधीनःपुरुषोलोकेधिक्कारमश्नुतेनितरां ॥ तस्यांयःसुविरक्तःस्त्वानं
दंभजतिसद्गुरोःकृपया ॥ ६२ ॥ अजघनविनिहितचित्ताश्चित्तभुवंसोत्रजयतियुक्तमिदं ॥ चित्रमनंगस्याप्याअनंगमादौति
रस्कुरुते ॥ ६३ ॥ विनीविजघनंदृष्ट्वासनीविस्त्रधनंवशां ॥ विहर्तुमपिवाहर्तुंनैवेच्छतिविरागवान् ॥ ६४ ॥ जितंये
नमनःपुंसामदनस्तज्जितोभवेत् ॥ अदएवमनःप्राज्ञाइत्यक्षरविदोविदुः ॥ ६५ ॥ जितेकामेजिताकांताकाममादौजयेत्ततः ॥
अकामस्यवशेसर्वाःसिद्धयःसिद्धिदोहरिः ॥ ६६ ॥ हरिभक्त्याजयेत्कामंयथाशुकमहामुनिः ॥ कथांसंक्षिपतस्तस्यवक्ष्यामिविरति
प्रदां ॥ ६७ ॥ शुकस्तपस्तीव्रतरंचकारमनोनिधायात्मनिवासुदेवे॥ तद्विघ्नहेतोस्त्रिदशाधिनाथोयुयोजरंभांमदनंवसंतं ॥६८ ॥ ययौकाम
वसंताभ्यांरंभाशुकतपोवनं ॥ तयानमोहितोयोगीचकारस्वतपोवनं ॥ ६९ ॥ अभिसारिकाशुकंत्वांविहितंसंबोधितुंप्रवृत्तास्मि ॥ शृणुम
द्वचनंसंप्रत्यतनुसुखस्येहभोक्तास्याः ॥ ७० ॥ सत्यानंतसुखात्मभोक्ताभोग्यंनभुक्तिरपि ॥ नाहंत्वमपिनकश्चनकाचनकिंचनकदापि
नैवास्ति ॥ ७१ ॥ सदेहस्थितिभाग्यत्वंविदेहात्मसुखंनते ॥ उज्वलात्माततोभूत्वाविमन नभवक्वचित् ॥ ७२ ॥ नदेहस्थितिभागस्मि
सदासत्यसुखात्मकः ॥ असंगोह्यमनानित्यमुज्वलत्वंकुतोपरं ॥७३॥ बिभर्षिसंततंदुखंनिराहारकृशंवपुः ॥ सदाहारेणतस्मात्वंशुचिना

Rajwade Sanshodhan Mandal, Dhule and Yeshwantrao Chavan Pratishthan, Mumbai

(10A)

सरसेकुरु ॥ ७४ ॥ सत्सुखंनित्यसंतृप्रमस्थूलमकृशंरसं ॥ कृष्णमेकंसमालोच्यनमन्येहंरसंपरं ॥ ७५ ॥ अयंप्रतारयत्येवलोकान्का
मवशोहरिः ॥ गोपिकासुरतःकस्माद्राजपुत्रीषुवापुरि ॥ ७६ ॥ निरुद्धसौरतोदेवोनिरुद्धोसौगतःकथं ॥ मुद्धाःकामस्यजेतारंवशमत्र
वदंतिये ॥ ७७ ॥ पापात्मनायलभ्यांमाममरेंद्रस्यवल्लभां ॥ त्यक्तुंनार्हसिसंप्राप्तांहतभाग्यःश्रियंयथा ॥ ७८ ॥ मातरिंद्रोपभुक्तात्व
मुपेंद्रस्यास्मिसेवकः ॥ मातःकिंचिदपिब्रूहिसुतेमयिदयांकुरु ॥ ७९ ॥ रंभावसंतकामास्तेन्हियाभूलोकतस्तदा ॥ परलोकंगतास्तस्मा
त्पराभूतिसुदुःखिताः ॥ ८० ॥ सोत्पत्तिज्ञानवैराग्यभक्तियुक्तमहामुनेः ॥ कथयास्यशुकस्यस्याद्वैराग्यंज्ञानभक्तिमत् ॥ ८१ ॥ काम
त्यागा समर्थोपिभवेद्धरिसमाश्रयः ॥ भक्तकल्पद्रुमःश्रीशोभुक्तिमुक्तिकरोयतः॥ ८२ ॥ संतानमुख्यनंदनसंप्राप्तावप्यनंतसुखभाङ्न ॥
अत्रामुत्रचलोकःक्षीयतइतिवेदवादोयत् ॥८३ ॥ सुतमरणशंकयाजोगुरुःसनिधनंगतोतिदुःखेन ॥ अश्वत्थामाजीवतितनुजप्रेम्णोस्तिको
लाभः ॥ ८४ ॥ कामाद्यैरिपुभिस्तावत्कलुषीकृतचेतसां ॥ नविरागोनवाभक्तिर्ज्ञानंतस्मादमूनूजयेत् ॥ ८५ ॥ एकोरिपुर्महानर्थकरश्चे
तसिजायते ॥ सर्वेमनसियस्यस्युस्तस्यकावानदुर्दशा ॥ ८६ ॥ कामाद्यन्यतमात्तसाधुत्हृदयःस्वांयोग्यतांवेत्तिनोनस्वंमित्रमरिंनवाद्विज
वरंनस्वामिनंसेवकं ॥ शक्तिंचापिनिजांपरस्यनतथालोकापवादंक्वचिन्नीचत्वंनचधर्महानिमथवानोमाननाशंजनः ॥ ८७ ॥ कामादि
रिपुसंघातंपरमार्थविघातकं ॥ हरिप्रसादलब्धेनविवेकेनजयेत्पुमान् ॥ ८८ ॥ कस्मात्सुखंकीदृगिदंविचिंत्यत्यजेदशेषंवृजिनंमहात्मा ॥
यच्छर्मकृद्भूमितलेप्रसिद्धंतदेवदुःखस्यपदंयतःस्यात् ॥ ८९ ॥ यत्सुखसाधनमस्मिंल्लोकेतद्दुःखदंतुकालेन ॥ एवंदुःखकरंयद्विपरीतंतदपि
दिष्टयोगेन ॥ ९० ॥ शीतत्तोयःसुखदोवान्हिर्ग्रीष्मेसुदुःखकृद्भवति ॥ आतपकालेशीतंवस्तुतथानैवाहिमसमये ॥ ९१ ॥ दीर्घंजरादुःखद
मायुरत्रधनंभवेद्भूरिदुराधयेच ॥ कांतासुखंसांतमपिप्रियवद्यंसहोदराःस्वार्थपराःसुताश्च ॥ ९२ ॥ खिन्नंचेतःसंगतोसज्जनानांखिन्नंचेतः

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(11)

भ. क. स्त्रीचरित्रात्सुदुष्टात् ॥ खिन्नंचेतोमेदुराशानिबद्धंखिन्नंचेतश्चायुषोऽप्यर्थहानेः ॥ ९३ ॥ सर्वपदार्थजातंननुसुखदंबहुलदुःखकृल्लोके ॥ एवं पू. स्क. ४
विचार्यमतिमान्भजेतसच्चित्सुखंहारिमनंतं ॥ ९४ ॥ संसारतःसर्वतएवदुःखंबुधोविचार्येतिहरिंभजेत ॥ प्रगल्भभक्तिर्बहुधाविरक्तिं
प्रयच्छतिज्ञानमपीहसम्यक् ॥ ९५ ॥ कायंत्रातनयंमनोज्ञविषयंसर्वस्वभावप्रियंरम्यंस्वालयमत्रसाधुमनसासांतंसमावीक्ष्यत्र ॥ स्त्रीसूनाम
॥ ९ ॥ दिराद्यनर्थजनकंस्थानंकलेर्वापुनार्हित्वाद्रव्यचयंसदेहभजतेशांतंरमेशंबुधः ॥ ९६ ॥ ममतात्रन्महादुःखंममतायात्वदस्तिमे ॥ अहंतापयुतो
यावदहंतामयितिष्ठति ॥ ९७ ॥ ममतापाययाभ्रांतोविद्ययैवानयाभृशं ॥ ममतापाययाभ्रांतोविद्ययास्यांकदाहरे ॥ ९८ ॥ विरक्तिमेव
मेंदेहित्रिविषयेष्वनपायिनीं ॥ ययाभवेद्भवभक्तिर्भवोद्भवभयापहा ॥ ९९ ॥ शास्त्रंविनाक्वापिकदापिकस्यनशोभतेकृत्यमशेषयत्नं ॥ अशा
स्त्रविन्मौनधरःसलज्जोनराजतेकोपिनरःसभायां । १०० ॥ शास्त्राणिदुर्बोधतयानमंदाजानंतिकिंचिन्मतिमंतएव ॥ मिथोविवादैरपि
पंडितानांचेतांसितान्येवविमोहयंति ॥ १ ॥ सर्वाणिमान्यानिभवंतितानिप्रोक्तानियस्मान्मुनिभिःश्रुतिज्ञैः ॥ अनेकशास्त्रैःसुविमोहितानां
किंवीतशंकंसुखमत्रलभ्यं ॥ २ ॥ अधीत्यशास्त्राणिगुरोःसकाशात्सभासुवादप्रतिविधानदक्षाः ॥ पराजिताःस्युर्यदिवादिभिस्तेभवेयुरत्यंत
मनोव्यथाप्ताः ॥ ३ ॥ वादितोत्रभयंयस्यपुंसश्चेतसिजायते ॥ सभाहीनाजनैर्यद्वदलंकारश्च्युतोपलः ॥ ४ ॥ नोभयंदृश्यतेयेननोभयंतस्य
जायते ॥ उभयंदृश्यतेयेनतस्योनोनंचसद्भयं ॥ ५ ॥ वादिभयंकिलतावद्यावन्मोहेननात्मविज्ञानं ॥ ज्ञातेकेवलआत्मनिनिर्द्वंद्वोनिर्भयो ॥ ९ ॥
भवति ॥ ६ ॥ सर्वशास्त्रार्थसिद्धांतबोधोयस्मात्प्रजायते ॥ तच्छास्त्रंसत्त्वसभ्योपिविबुधैःश्लाध्यतेसदा ॥ ७ ॥ सततानंदसंपुष्टीरसोयत्र
विराजते ॥ सदाहारेणपात्रेणशास्त्रेणचसभाजनः ॥ ८ ॥ शास्त्रंगीताभिधंसाधुश्रीमद्भागवतंतथा ॥ सच्चिंतेयेनवर्द्धंतेज्ञानवैराग्य
भक्तयः ॥ ९ ॥ शास्त्रेषुवायदिदृढाभिनिवेशवान्स्यात्संसारितामुपगतोननिवृत्तिमेति ॥ तस्माद्बुधःसकलशास्त्रसमूहसारंश्रीमन्मुकुंद

(11A)

पदमेवभजेद्विमुक्त्यै ॥ १० ॥ असंकीर्त्यगोविंदमीड्यंगिरीशंपठन्पाठयन्केवलंशब्दशास्त्रं ॥ भुजंगेशवाणीमधीयानमेनंभुजंगंवदंती
हसंतश्चसंतः ॥ ११ ॥ अहोस्फोटाननोयस्यरसाःसर्वेपिनीरसाः ॥ लोककुत्सावहांधत्तेबहुलालापतांमुखे ॥ १२ ॥ अवच्छेदकतांवक्त्रे
धत्तेयःसततंसखे ॥ सुभाषितसुमोछेदीसौरभ्याज्ञःसवानरः ॥ १३ ॥ यश्चवादरतोनित्यंन्यायशास्त्रकृतश्रमः ॥ नतस्यसुलभंशर्मयदवाक्
स्वांतगोचरं ॥ १४ ॥ नकर्मठःश्रीहरिमार्गविज्ञःसांख्यश्च्युतोयोगयुतोतिमंदः ॥ विमुक्तमानोनिपतत्यधस्तात्पूर्णात्मरूपोभवतीश
भक्तः ॥ १५ ॥ सांगानधीत्यवेदान्सार्थान्यदिसाक्षरोहमितिमानी ॥ एकाक्षरघनभिज्ञःसाक्षरपदभाक्कथंसस्यात् ॥ १६ ॥ वेदांतवेद्यं
तत्रपादपांसुंविधायमन्मूर्धनिवासुदेव ॥ नशास्त्रवादैरतिदुर्निवारैर्विमोहयत्वंममचेतएतत् ॥ १७ ॥ भक्तिकल्पद्रुमेमुग्धिमन्गंगाधराविनि
र्मिते ॥ पूर्वार्द्धस्तबकःपूर्णश्चतुर्थोस्तुसतांमुदे ॥ १८॥ इतिश्रीभक्तिक०चतुर्थस्तबकः ॥ ४ ॥ ॥ ॥ ॥ ॥

(12)

॥ श्रीगणेशायनमः ॥ हरिभक्तिर्मतोमुख्यःपुरुषार्थोमतेसतां ॥ धर्मार्थकाममोक्षाख्याययायांत्यांशुवश्यतां ॥ १ ॥ धर्मार्थकाममोक्षा
ख्यंपुरुषार्थचतुष्टयं ॥ तत्रमोक्षस्यमुख्यत्वंसैवविद्यामयोस्तियत् ॥ २ ॥ अविद्यामयएवासौत्रिवर्गोमूढसंमतः ॥ अतस्तस्मैविरक्ताथे
स्पृहयंतिकदापिन ॥ ३ ॥ प्राक्पुण्यपरिपाकेनपरेशानुग्रहेणच ॥ भवेत्खुनिर्मलस्वांतपुरुषाणांमुमुक्षुता ॥ ४ ॥ पंचमःपुरुषार्थःसयोनु
रागःपरेश्वरे ॥ अपिमुक्तदशायांस्यान्महाभक्तस्यकस्यचित् ॥ ५ ॥ त्रिवर्गकामनाःकेचिदपवर्गेच्छवःपरे ॥ वयंतुसच्चिदानंदश्रीनाथ
प्रीतिकामुकाः ॥ ६ ॥ आद्याक्षरस्वरूपेतुभक्तैर्भगवतोपिवा ॥ नचभक्तस्यकुत्रापिभेदःसद्भिर्विलोक्यते ॥७॥ तथापिभक्तयेभक्तैर्भेदोयः
कल्पितोभवेत् ॥ विशेषानंददातासभक्तानामेवसंमतः ॥ ८ ॥ सोनुरागःपराभक्तिःप्रेमभावइतीरितः ॥ तदर्थमेवसरसायतंतेनवि
मुक्तये ॥ ९ ॥ भक्तिस्तुद्विविधाप्रोक्तासद्भिर्भक्तैर्मनीषिभिः ॥ प्रथमासाधनाभिख्यासाध्यैवान्याप्रकीर्तिता ॥ १० ॥ आद्यानवविधा
प्रोक्ताश्रवणादिप्रकारका ॥ यामतासाधनाख्येहतत्त्वज्ञैःकृतापृथक् ॥ ११ ॥ चत्वारःस्युर्भक्ताआर्तोजिज्ञासुरर्थकामीच ॥ ज्ञान्य
बुधोबुधएतेविशेषणेज्ञानिभिन्नस्य ॥१२॥ रोगैररिभिर्वाविहरिंभजतितद्विनाशनायैव ॥ जपहोमाद्यासक्तःसस्यादबुधःप्रथमभक्तः ॥१३॥
ज्ञानेनभवतिपूजानरस्यतज्ज्ञानमस्तुमत्वैवं ॥ भजतिश्रीहरिमबुधःप्रोक्ताजिज्ञासुरिहभक्तः ॥ १४ ॥ इममर्थमहंलब्ध्वावत्स्याम्यस्मिन्गृ
हेसुखेनेति ॥ व्रजपदानादिकरःसोर्थार्थ्यबुधोहरेर्भक्तः ॥१५॥तापत्रयस्यमूलंमत्वासंसारमेवयःकृष्णं ॥ तन्नाशायैवभजतिबुधःसभक्तः
प्रथमआर्तः ॥ १६ ॥ किमिदंकुतउत्पन्नंकोहंकर्तास्यविद्यतेकोवा ॥ ज्ञातुमितिश्रीशंयोभजतिबुधःसैवाजिज्ञासुः ॥ १७ ॥ सकलेभ्योप्यर्थे
भ्योनानंदंनाशरहितमाप्नोति ॥ इतियःपरमार्थार्थंबुधोभजत्यर्थकामःसः ॥ १८ ॥ सुविचाराद्वैराग्यादबुधस्यतुलक्षणंसदात्याज्यं ॥
भक्तेनविभोर्भक्तिःकार्याबुधलक्षणेनैव ॥ १९ ॥ योगिभ्योपिगरिष्ठःस्वकर्मकृत्श्रीहरिंभजेदेकयात् ॥ सज्ञानीभक्तइतिप्रोक्तःपरमेश्वर।

भिन्नः ॥ २० ॥ यद्यपिपरोक्षबोधःसभ्रद्धःस्याद्भवांतरेज्ञानी ॥ योभ्रद्धोवाकुशलोनबोधवान्क्वापिजायेत ॥ २१ ॥ अन्योहंदेवान्योमत्वै
वंयोभजेद्धरिंसस्यात् ॥ श्रुतिवचनात्पशुतुल्यस्तस्मादद्वयतयाभक्तिः ॥ २२ ॥ आत्मनिभेदाभावान्नविशेषोदृश्यतेयादिचकैश्चित् ॥
तेभ्योवरंचतुष्पात्पशुरितिसार्थाभिधोयस्मात् ॥ २३ ॥ भवेत्सुखायैवभक्तोपितस्ययःश्रीहरिंभिन्नदृशानपश्येत् ॥ विलोकयेद्भेदधियात्र
कश्चित्भवायचित्रंविभक्तोपिनस्य ॥२४॥ जगद्यस्मात्समुत्पन्नंस्थितंयस्मिन्विलीयते ॥ आत्मानंविष्णुमेकांतंपश्येत्ज्ञानेनभक्तिमान्॥२५॥
नतत्वंबुध्यतेज्ञानंविनाभक्तेःकथंचन ॥ नतयाचविनाक्वापिज्ञानंसम्यक्प्रजायते ॥ २६ ॥ अंतःसंक्षेपतोज्ञानंभक्तिसाधनमुच्यते ॥
वासुदेवमयंविश्वंयेनपश्यत्यमोहितः ॥ २७ ॥ असंगोनिर्मलःशांतोचलःपराक्षिरःसदा ॥ एकआत्माचिदानंदोविश्वरूपःश्रुतीरितः ॥२८
देहेविकाररूपेमलालयेकालसर्पमंडूके ॥ सुज्ञःकथमात्मत्वंकुर्यादज्ञानाभिवोस्मिन् ॥ २९ ॥ देहःकथमात्मास्यात्जरायुतोविषयविमुख
एवायं ॥ देहीत्विच्छन्विषयानमुंविनिंदत्यशक्तत्वात् ॥ ३० ॥ अन्योन्यधर्मभेदाद्दात्मत्वंनेंद्रियेषुसंघटते ॥ तादृक्षुप्राणेष्वपिजडे
षुवातत्कथंवाच्यं ॥ ३१ ॥ अस्थिरवृत्तिनिमनसिचकामादीनांनिवासभूतेस्मिन् ॥ दृश्यत्वादात्मत्वंनज्ञेयंक्वापिविबुधेन ॥ ३२ ॥
बुद्धावपिदृश्यत्वात्पदार्थबोधानुरूपानिश्चयतः ॥ अनुभवमात्रज्ञेयंकथमात्मत्वंविजानीयात् ॥ ३३ ॥ अनिमूढस्याप्यहमित्येकत्व
स्यैवबोधिकास्फूर्तिः ॥ संघातात्मकमेतल्लिंगंजडमात्मरूपंन ॥ ३४ ॥ अहमस्म्यर्थोप्यस्मिन्कोहंस्फूर्तिकरोत्यविद्यासा ॥ कारणमुपा
धिमेवंवदंतिविबुधाःकिमात्मासौ ॥ ३५ ॥ विश्वात्मानहिविश्वोज्योतिर्ज्योतिः स्वयंनतैजसकः ॥ आम्नायगम्यमहिमाप्राज्ञोनात्मेतिगुरु
चित्रं ॥३६॥ यःसर्वसाक्षीस्वरतःसदैवविभातिचप्रेष्ठतयाखिलेभ्यः ॥ आत्मासविश्वंनहिकोपिभेदोत्रब्रैवसर्वंश्रुतिराहयस्मात् ॥ ३७ ॥
उत्पद्यतेविलीयतआत्मानिसाचित्सुखाब्धिरूपेस्मिन् ॥ भंगस्वरूपमेतत्प्रकथ्यतेविश्वामितिहेतोः॥३८॥ जलनिध्यूर्मिविचारेकोपितरंगोजला

## मूळ प्रत पाहण्यासाठी संपर्क

---

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com